सम्बन्धप्रतिपत्तिफलयोरीदृशप्रतिपत्तौ गतत्वेनातिव्यापकत्वात्। वि-
नापि वा प्रायःशब्दमभिहितस्य तस्यानुसन्धाने प्रसङ्गः। तत्र कानन
संज्ञासंज्ञिसम्बन्धावधारणेऽप्यन्यत्रैव पदान्तरसमभिव्याहारोत्थया
अन्यथानुपपत्तेः प्रमाणत्वात् क्व तूपमानस्य। उपमेय संज्ञासमभिव्याहृ-
तेतिविशेषणे च पूर्ववदेव निरासः। वाक्यार्थत्वमपि तादृगेव प्रतिपत्ति
फलात्मतातिदेशवाक्यगतकाननादिपदार्थस्य तथाविधप्रत्ययाव्याप-
नात्। वाक्यैकदेशस्यापि वाक्यत्वेन विवक्षितत्वे सदृशो गवय इत्यादि
वाक्यशेषेऽपि प्रत्यये प्रसङ्गात्। प्रतीत्युत्पत्तिं प्रति प्रयोजकीभूतं याव-
त्तावद्वाक्यं विवक्षितमिति चेन्न अन्तर्भावितवनाधिकरणतादृशप्रति-
पत्तिं प्रति तस्य प्रयोजकत्वात्। उपमितिं प्रतीति तु पूर्ववन्निरस्त
मिति। यावत्संज्ञासंज्ञिबुद्धिप्रापकं तावद्विवक्षितमिति चेन्न तत्त्वग
सहचरितसंज्ञोपदेशार्थानुसन्धानेऽपि प्रसङ्गात्। किञ्च यदा तर्कानु-
सन्धानविरहिणः सत्यप्येवंविधानुसन्धाने सादृश्यमेव गवयपदप्रवृत्ति
निमित्तमिति सति फलमुत्पद्यते। तदा तस्याप्रमाकरणस्यापि उपमा-
नत्वमापद्यते प्रमाफलकमिति विशेषणप्रक्षेपपक्षे चानुसंहितरूपव्यव-
च्छेद्यत्वानुमित्युत्पादेनाप्येतादृशानुसन्धानमुपमानं स्यात्। अव्याप्तवि-
षयप्रमाफलकमिति विशेषणीयमिति चेन्न वस्तुगत्या अव्याप्तत्वस्योपमेये
ऽप्यभावात्। व्याप्ततयाऽनवगम्यमानस्येति च कृते यत्रापि तल्लिङ्गं तेन
सह व्याप्तत्वावगतमुपमितिकरणमपि न व्याप्नुयात्। उपमेयेन सह
व्याप्तत्वानवगतत्वोक्तावप्यनुमाने प्रसङ्गस्तदवस्थः। अनुमेयेन सहेति
कृते च तदनपायादव्याप्तिस्तदवस्थैव। संज्ञासंज्ञिसम्बन्धप्रमितिकरण
मिति चेन्न तथात्वासिद्धेः अर्थापत्त्यादिना तत्सिद्धेर्वक्ष्यमाणत्वात्। अन-
नुमितिजनकं तादृशप्रतिसन्धानमुपमानमिति चेन्न तज्जातीयस्यानु-
मितिजनकत्वात् व्यक्त्यपेक्षायाश्च जनकत्वस्य सामान्याकारपर्य्यवसा-
यिनो निर्वक्तुं व्यक्त्यावसम्भावितया अननुगमेन चायुक्तत्वादिति। किञ्च
गोसादृश्यं विहायावयवत्वजातौ गवयशब्दार्थताप्रतीतिः कल्पनालाघवं

तर्कानपास्य न स्यादिति तदुपन्यासस्थितौ किमानुमानिकत्वेव तत्र गवय-त्वस्य गवयपदवाच्यताप्रमितिरियं नेष्यते । सम्भवति हि प्रयोगः वि-मतिपदं गवयशब्दप्रवृत्तिनिमित्तं तथात्वे तर्कोऽस्य विपरीतप्रियमाण-विपर्ययकत्वात् न यदेवं न तदेवं यथा गोत्वं तथा चेदं तस्मात्तथेति । न चास्ति सम्भवो मूलशैथिल्यादिदोषविरहितर्कनिवेदितविपर्ययपर्यवसायो-ऽत्र तथेति । अथवा गवयपदस्य सम्भवत्प्रवृत्तिनिमित्तान्तरमनुपपद्य-माना प्रोक्तगोसादृश्यसामानाधिकरण्यमर्थाद्गवयत्वप्रवृत्तिनिमित्तक-तामाक्षिपतीत्यर्थापत्तिरेवात्र प्रमाणमस्तु । सा च त्वया व्यतिरेकी त्यस्य परेण पृथगेवावश्यं प्रमाणनीयेति ।

शब्दोऽपि न उच्यते । आप्तवाक्यं शब्दः प्रमाणमिति हि न युक्तं विकल्पानुपपत्तेः । तथाहि कोऽयमाप्तो नाम । यथादृष्टवादीति चेन्न भ्रान्तिप्रतिपन्नयादृग्वाक्येऽपि प्रसङ्गात् । प्रमाणादृष्टेति विशेषणे च तथा-भूतस्यान्यथावादस्यापतनात् । यथाप्रमाणेति करणे पक्षे तथाभूत-वादिवाक्यस्यायथार्थस्यापि व्यापनात् । यावद्यथाप्रमाणादृष्टे नियतौ च प्रायेणातथाभूतत्वादेव लक्षणानां तदव्याप्तेः । यद्धि यावत्प्रमितं ताव-दभिधीयते यथाप्रमितस्यैव च वक्तुर्वाक्यमिति व्याकारे च युधिष्ठिर-वाक्यस्याप्येवम्भूतत्वे नाव्याप्त्यापत्तेः । तत्र विषयवृत्तिविशेषणे च वि-शेषरूपस्य विषयस्यासाधारण्येनाव्यापकत्वापातात् । अथ निर्दोषस्य वाक्यं तथेति चेन्न सदोषस्य नास्ति घटोऽस्त्यभिधित्सतोऽस्ति घट इति दैवान्निर्गतयथार्थवाक्याव्याप्तेः । तदप्रमाणं न भवत्येवेति चेन्न पूर्वमुक्तो-त्तरत्वात् । प्रवृत्तिसामर्थ्येन प्रामाण्यावधारणासम्भवादापाततः सन्दे-हेऽप्यदोषात् सामान्यतो निर्दोषत्वस्य मीमांसकेऽप्यभावात् विशेषत-स्तथात्वस्यासाधारणपर्यवसायित्वात् । यथार्थवाक्यं शब्दः प्रमाण-मित्यत्र को दोष इति चेन्न पूर्वोक्तयथार्थ्यदूषणानि तावत्प्रथमः । यथार्थत्वविशेषणस्य व्यवच्छेद्यत्वाव्यवच्छेदकत्वयोः पूर्ववदोषश्च द्वि-तीयः । वाक्यतानिरुक्तिश्च तृतीयः ।

तथाहि किमिदं वाक्यं नाम । एकार्थावच्छिन्नपदसमुदायो वाक्यमिति चेन्न एकत्वविषयत्वावच्छिन्नत्वानां व्याख्यानि दूषणानि तावत्सन्तु पदपदार्थेषु चिन्तयामः । सुप्तिङन्तं पदमिति केचित् वर्णा विभक्त्यन्ताः पदमित्यन्ये । तत्र नाद्यः प्रत्येकं मिलितस्य चाव्यापकत्वात् पृथक्प्रवृत्तिनिमित्ततायाश्च वाच्यलक्षणाव्यापकत्वापातात् । नापि द्वितीयः विभक्त्यर्थस्यानुगतस्यासम्भवात् विभक्तिरित्यनेन सुप्तिङो प्राग्दिशोविभक्तिरित्यनेन च तसिलादेः पृथक् पृथगेव विभक्तिसंज्ञा विधानात् शब्दसाम्येन च लक्षणायोगात् । किञ्च वर्णा इति वक्तृत्वस्य विवक्षितत्वे पचन्तमित्यादेरपदत्वप्रसङ्गः । अविवक्षितत्वे देवदत्त इत्यन्ताकारस्य पदत्वापातः तस्य विभक्त्यन्तत्वात् । सार्थकस्तथेति चेत् भवतीत्यादौ भवकारादीनां पदत्वप्रसङ्गः धातोः सार्थकत्वात् । यतो विहिता विभक्तिस्तदिति चेन्न भकारं परित्यज्य पदत्वप्रसङ्गात् । तन्मध्यपतितत्वाद्भकारोऽपि गृह्यत इति चेत् तर्हि यत्र विभक्तिर्विधीयते तत्र तद्विभक्तिमध्यपतितञ्च पदमिति वा विवक्षितं यत्र विभक्तिर्विधीयते तत्तद्विभक्तिमध्यवर्त्तिसहितं पदमिति वा । आद्ये भकारस्यापि पृथगेव पदत्वप्रसङ्गः लक्षणस्य चाव्यापकता । द्वितीये देवदत्त इत्यस्यापदत्वप्रसङ्गः मध्यवर्त्तिनोऽभावे मध्यवर्त्तिसहितविशेषणाभावात् । क्वचिन्मध्यवर्त्तिसहितस्य क्वचित्केवलस्य चेति यथासम्भवमिति चेन्न एकानुगतरूपानभिधाने लक्षणस्याव्यापकतापत्तेर्दुर्निवारत्वात् । किञ्च देवदत्तस्त्वित्यपि पदं स्यात् । अथापशब्दोऽयं पदत्वे सति सत्वादेर्विधानस्यावश्यम्भावित्वादिति चेन्न यतएवायमपशब्दस्तत एव भवतो दोषः प्रसज्यते अपशब्देऽपि पदलक्षणं गतमिति । तस्मात्पाणिनिनाचार्य्येण शब्दसिद्ध्यर्थं पदसंज्ञेयं सत्वादिविध्यनुरोधेनापशब्दशब्दामन्यैव कृता नदीसंज्ञावत् । ननु लौकिकपदव्यवहारसिद्ध्यर्थं साधुशब्दविशेषे ततश्च तस्यापदेव लक्षणं वाच्यमन्यथा दाक्षीनन्दनोदीरितनदीसंज्ञाप्रत्यभिज्ञायां माघः प्रार्थयमानः काननस्थलीमध्यीकामि-

ज्ञानी भवानीहेत। अथोच्यते विभक्त्यन्तमेव सर्व्वलक्षणप्रक्रिया निष्पन्नं व्यावहारिकं पदमिति लक्षणमस्तु। नैवम् सर्व्वलक्षणप्रवृत्तेः सर्व्वथाभावात्। सम्भवत्सर्व्वलक्षणप्रवृत्त्येति चेन्न सम्भवत्त्वं तत्काले कालान्तरे वा विवक्षितम्। आद्ये देवदत्तर्व्वियंत्यपि पदं स्यात् तत्व विधानकाले विसर्गस्यासम्भावितत्वात्। कालान्तरेऽपीतिपक्षे देवदत्त इत्यपि पदं न स्यात इत्यादिपदपूर्व्वकालभाविनो यद्वयलोपादेरकार-णात्। शब्दान्तरसन्निधिव्यतिरेकेण यद्भावि लक्षणं तद्विवक्षितमिति चेन्न जीविकाकृत्य व्याचष्टइत्यत्र जीविकां कृत्वा व्याचष्टइति प्रयुज्य-मानं बाध्यं स्यात्। एकार्थावच्छिन्नपदसमुदायस्य तत्रापि गतत्वात् कृत्वेत्यनेन समुदस्य जीविकामित्यस्योक्तपदलक्षणेन संगृहीतत्वात्। यदुपाधिका यल्लक्षणप्रवृत्तिस्तदुपाधिसम्पत्तौ तेन निष्पन्नं तदिति चेन्न यत्र नास्त्युपाधिसम्पत्तिस्तत्र केवले तस्यां सत्यामित्यस्याभावाद पदत्वापत्तेः। यस्यामवस्थायां यस्य लक्षणस्योपनिपातस्तत्सर्व्वसम्पत्तौ विभक्त्यन्तं पदमिति चेन्न यस्यामवस्थायामित्यवस्थानां भिन्नभिन्ना कारेण परामर्शे लक्षणस्याननुगमादव्यापकतादोषः अवस्थाना मैक्य-न्त्वविवक्षितमसम्भावितञ्च। सर्व्वदा सर्व्वावस्थाविषये लक्षणप्रसङ्गा-दिति। सच भवति भवतो वा पटः पटाविति वा घटं घटाविति चेत्यतिव्याप्तिः। एतेनापोत्थेयं वाक्यं तदित्यपि निरस्तम्।

का पुनरर्थापत्तिः। अन्यथानुपपत्तिरिति चेन्न यतोऽन्यत्वं तत्-सिद्धेरग्रे तदसिद्धेः। सिद्धेनानुपपत्तिरिति चेन्न विशेषणाव्यवच्छेद्या-प्रतीतौ तद्वैयर्थ्ये न तदनुपादाने सर्व्वथानुपपद्यार्थतायां फलविरोधात् केनाप्यनुपपद्यार्थत्वे साध्यसिद्ध्यपर्य्यवसानात्। प्रमाणयोर्विरोधानुप-पत्तिरिति चेन्न असिद्धत्वात् प्रमाणत्वेनाभिमन्यमानयोरिति चेत् अभिमतेर्व्व्यार्थत्वेऽतिप्रसङ्गात् प्रामाण्येऽप्युक्तदोषानिवृत्तिरेव। अनिर्णीयमानप्रामाण्याप्रामाण्ययोरित्यत्रापि तथैव तथाहि सन्दिति पक्षेऽपि तस्य तदुत्पादकप्रमाणाभावत्वापत्तेः। तत्र विरोधेनव्याख्यात्वेना

प्रमाणत्वनिश्चयः यत्र तु नैवं तद्विवक्षितमिति चेन्न सत्प्रतिपक्षवदन्यत्रापि विरुद्धार्थत्वेनैवाभासत्वाविशेषात् । तर्कयोर्विरोधोऽपेक्षित इति चेन्न मिथोविरोधेन तर्कयोरप्याभासत्वात् । विशेषप्रवृत्तप्रमाणार्थं प्रतिक्षेपविषयत्वसंशयोऽविशेषप्रवृत्ततद्विपरीतार्थप्रमाणस्य विरोध इति चेन्न विशेषविषयप्रमाणबोधितवैपरीत्ये सति तद्विरुद्धार्थतायै संशयस्य दुर्बलस्यानवकाशत्वेनाविशेषप्रवृत्तप्रमाणविषयतां तदीयां शोधयितुमप्यसामर्थ्यादेव । अविशेषप्रवृत्तस्य प्रमाणस्य तद्विपरीतार्थविशेषविषयस्य च प्रमाणस्य विषययोस्तद्विपरीतत्वविशेषणप्रत्यङ्गीकारे तत्त्वायां परस्परविरुद्धत्वप्रतीतौ धर्म्मिणो विरुद्धधर्म्माध्यासस्य भेदस्य विरोधविवेचनस्फुटतरप्रवेशतया तत्प्रवृत्तेर्यस्य तन्नान्तरीयकस्य वाऽन्यस्य वाऽन्यतरस्य प्राप्तेः । किञ्चाविशेषप्रवृत्तस्यैव तस्य किं विशेषविषयत्वम् । अथ सामान्यतः प्रवृत्तस्य नान्तरीयकतया प्रागेव विशेषविषयस्य विशेषविषयत्वेनाज्ञातस्य विशेषविषयत्वं वा सामान्यस्य तद्विषयस्य विशेषः उत तद्विपरीतत्वविशेषणत्वं किमपि धर्म्मान्तरमिदानीं प्रतीयते । नाद्यः कथं प्रत्तेश्च मृषात्वापत्तेः । न द्वितीयस्तदनुपस्थतायोत्पत्ते तद्विषयाप्रतीत्यसम्भवात् । न तृतीयः सामान्यस्यानन्तर्भावितान्यस्य प्रत्येतुमशक्यत्वात् प्रागेव तत्सिद्धेः । नापि चतुर्थः तद्धि प्रतीयमानविरोधिव्यतिरिक्तत्वमन्यदा स्यात् । नाद्यः तत्प्रतीतौ सामर्थ्याद्युपदर्शनेनानियमप्रसङ्गात् । न प्रथमः अनुगतानुभवजातिव्यक्ति चाक्षुषाचाक्षुषादिव्यक्ति गन्धादितादात्म्यवादिनये तदुभयप्रमातादात्म्यविषयतात्युदासं विना विरोधासिद्ध्या तद्धर्म्यविरोधवत्तस्यैवासिद्धेः तदुभयप्रतीतौ च तदवधारणे प्रागेव तत्प्रतीत्यर्थापत्त्यनुवाददतापत्तेः ।

योग्यानुपलम्भोऽभावप्रमाकारणमित्यप्ययुक्तं प्रमाणाभावस्य तथात्वे भ्रमानुदयप्रसङ्गात् । उपलम्भाभावमात्रस्य तथात्वे शङ्खपत्रिकप्रतिसन्धानवतः पीतभ्रमानुदयप्रसङ्गात् । कालभेदात्तथाविरोध इति

चेन्न तथापि संसृष्टयोरन्योन्याभावाग्रहणाप्रसङ्गात् तादात्म्यस्य स्वरूप मात्रानतिरेकात् अभावस्फुरणे च तत्प्रतिभासस्य ध्रौव्यात्। किञ्च योग्यता हि तत्तदविनाभूतान्यप्रतियोगिप्रमापकसाकल्यमिष्यते तथा सति च यत्र भवितोपलम्भः तत्राप्यभावप्रमा स्यात्। नहि तत्र हेतु व्यतिरेकेणैव वा सत्त्वेव वा तदभावप्रमोत्पद्यते। अथ तदविनाभूतविरह सहितः स तथेति चेन्न तदविनाभूतव्यतिरेकस्य तद्व्यतिरेकेणैवान्यथा- सिद्धसन्निधेरपि हेतुत्वाङ्गीकारे प्रमाणाभावात्। अत एवालोकस्या व्यञ्जके आलोकान्तरवदवयवेनावयविना वा आलोकेनान्यथासिद्धसन्नि धिरहेतुरित्यालोकाभावग्रहे सा नापेक्ष्यते। अर्थाद्योगस्तु नार्थ व्यापारोऽप्रवर्तकत्वात् तद्विरहसहितः स तथेति चेन्न इन्द्रियसन्निकर्षस्य हि प्रतियोग्यनुपलम्भे तावद्धेतुताङ्गीक्रियते तत्र किं सन्निकर्षव्यति रेकेणार्थान्वयोदाहरणमित्थं नवा। न यदि तदा सन्निकर्षस्य हेतुतैव कुतोऽन्यथाऽन्यथैव कार्योत्पत्त्युपपत्तेः। एवं चेत्तर्हि तथैवोदाहरणे व्यवधायकेनेन्द्रियसन्निकर्षशून्ये परमार्थसदभाववत्युत्पादकसम्पत्ते रभावप्रमा स्यात्। अत्र व्यवधायकाभावः प्रतियोग्युपलम्भको ना- स्तीति चेन्न सन्निकर्षव्यतिरेकस्य प्रमाव्यतिरेकप्रयोजकत्वादवधारणो दाहरणमेव तर्हि तन्न स्यात्। व्यवधायकस्य सन्निकर्षविरोधेनैव प्रमा विरोधित्वमिति चेत् तर्हि व्यवधायकाभावः सन्निकर्षोत्पत्तौ कारणं न त्वभावप्रमाविशेषोत्पत्ताविति स्थिते स प्रसङ्गस्तदवस्थ एव। नच सन्निकर्षाभावादेव तदानीमुक्तकारणासम्पत्तिः प्रतियोगिसन्निकर्षस्या भावप्रमोत्पादकत्वे नित्यं तदनुत्पत्त्यापत्तेः। अत एव नान्यथाऽनव- धिकं कारणमेव्यमिन्द्रियसन्निकर्षस्य तदुपपत्तेः। न चाश्रयसाक्षा त्कारोऽपि ग्राह्याश्रितत्वाग्रहादौ व्यभिचारात्। ननु व्यवधायकसद्भा- वेऽपि यत्र परमार्थतोऽस्त्यभाव स्तत्र तत्कारणादभावावधारणमस्त्येव को विरोधो न तावज्ज्ञानयोर्भिन्नविषयत्वेऽपि तावता तद्विरहप्रमा प्रसज्येत। तर्हि प्रतियोग्यभावसहितोऽनुपलम्भ एवाभावप्रमाकारणमस्तु अहीहि

योग्यताविशेषस्यानिवेशनव्यसनम्। योग्यताविशेषस्याप्रक्षेपेऽनुपलम्भ-
मात्रतो वस्तुगत्या प्रतियोग्यभाववत्यपि नाभावनिश्चयः कदाचित्तु
संशयो जायते तत्कथं तथाङ्गीक्रियत इति चेत् तर्हि व्यवधानेऽप्येवमेवेति
योग्यताविशेषणाप्रक्षेपेऽपि तुल्यम्। अपि च नैयत्यस्य वास्तवं सत्त्वं
प्रमाणकोटावनिवेशार्थमेव नैयत्यवस्तुसत्त्वनिर्द्धारणार्थमेव हि प्रमाणा
प्रमाणविवेचनं विचारकाणाम्। अन्यथानुमाने व्याप्त्यनुपाधिनिरासा-
यासो व्यर्थः स्यात् व्याप्तिपक्षधर्मताज्ञानसाम्यस्यैव कारणत्वाङ्गीकारेण
सौलभ्यात्। प्राक्कालिकप्रमितौ च यद्यभावप्रमाणतां मन्यसे तर्हि
सा न स्यात्। तत्रेदानीं जायमानाभावप्रमोत्पत्तावभाववास्तवसत्ता-
विरहस्यापीदानीं कथञ्चित्सम्भवात्। फलविषयकालिकाभावोपलब्धि-
ताऽवस्थादेः कारणकोटिनिवेशने विशेषाभावात्। तदुपलब्धितत्त्वस्यैव
विशेषणस्य विशेषत्वेऽतिप्रसङ्गात्। तथापि सामान्यतो विशेषाभावोऽ
सिद्ध इति चेन्न तस्य सत्त्वे निर्वचनापातात्।

अन्यथासिद्धो नाम। तथाहि व्याप्तिपक्षधर्मताभ्यामप्रमितो
ऽसिद्ध इत्यलक्षणं हेत्वाभासान्तराणामपि असिद्धप्रवेश एवं सति
स्यात्। व्याप्तिं पक्षधर्मतां तत्प्रमितिं वा न विरुन्धतो हेतुदोषत्वा-
भावात्। ननु नैवमीदृशं तथाहि केचिद्दोषा व्याप्तिपक्षधर्मतातत्
प्रमितिविरहात्मानः केचित्तु व्याप्त्यादिलिङ्गभङ्गभूताः प्रतिबन्धक-
तया प्रमित्युत्पत्तिं विरुन्धानाश्च केचिद्दोषभूयं भजन्ते। तत्र प्रथमे
तावदसिद्धमध्यमध्यासते। तद्यथा व्याप्यत्वासिद्धः सोपाधिरूपः।
अनौपाधिकसम्बन्धिता हि व्याप्तिः सोपाधिता चानुपाधितविरह
रूपैव एवमभिमतस्यासिद्धिरप्यसिद्धावेवान्तर्भविष्णुः। पक्षप्रदेशपा-
सम्बन्धाश्रयस्य व्यतिरेकरूपा हि सा। सिद्धसाधनमपि तथैव सिषा-
धयिषितधर्म्मविशिष्टो हि धर्म्मी पक्ष उच्यते। यत्र सिद्धं न तत्र
सिषाधयिषास्ति ततो विशेषणाभावापत्तौ विशिष्टस्य पक्षरूपस्य
तथाभावः। नच वाच्यं यथा सव्यभिचारत्वाद्धूमव्याप्तिकमिति पृथगेव

सव्यभिचारस्य दोषत्वं तथाऽसिद्धत्वात्तत्र सिषाधयिषा नास्तीति सिद्धत्वस्यापि पृथगेव दोषत्वं प्राप्नोति लिङ्गदोषासिद्धिपर्यवसायित्वात् । अन्यथा व्याप्त्यादिविरहपर्यवसायितानाशेन सव्यभिचारत्वादीनामप्यसिद्धत्वेनान्तर्भावः स्यादिति । यतः सिषाधयिषाभावो न प्रतिपन्नासिद्धत्वाल्लिङ्गाद्गम्यते । किं नामेच्छाभावस्य तस्य तस्य यथादर्शनं प्रत्यक्षादेरेवाधिगम इच्छैव तु तत्र यद्यस्ति तत्र सिद्धत्वं प्रयोजकमित्येतावन्मात्रेण सिद्धत्वमुपन्यस्यते लिङ्गसाधने नत्विच्छाभावमनुमातुं लिङ्गतयेति एवं स्वरूपासिद्धिरपि पक्षधर्म्मताविरहरूपैव । ये तु व्याप्तिपक्षधर्म्मताविरहलिङ्गभूतास्तेऽसिद्धतः पृथगेव हेत्वाभासाः । तथाहि विरुद्धः साध्यविपरीतव्याप्तः तत्र साध्यव्यतिरेकव्याप्तता हेतोर्न साध्यव्याप्तताभावः । किन्नाम साध्यव्यतिरेकेण सहानौपाधिकासम्बन्धोऽन्य एवासौ इत्थमेव पक्षधर्म्मताविरहात्कापि नायम् । किन्नाम ततः साध्यव्यतिरेकेण सह निरुपाधिसम्बन्धात् तत्र साध्यव्याप्तिरस्य नास्तीत्यनुमीयते । तथा सति च साध्यव्याप्तिव्यतिरेकलिङ्गं सद्विरुद्धः पृथगेव हेत्वाभासो भवति । एवमनैकान्तिकोऽपि न व्याप्तिव्यतिरेकरूपः किन्तु तल्लिङ्गमेव । तथाहि हेतोरन्वयस्य व्यतिरेकस्य वा व्यभिचारो न साध्यसाधनव्याप्तिविरहात्मा किन्नाम व्यभिचारो हेतोः साध्यव्याप्तिविरहं विना न सम्भवतीति लिङ्गभावेन व्याप्तिभङ्गं बोधयति । यदि हि निरुपाधिः साध्येन सम्बन्धोऽस्य भवेत्कथं व्यभिचरितुं शक्नुयात् । तस्माद्व्याप्तिविरहलिङ्गं व्यभिचारो नतु व्याप्तिविरहः पक्षधर्म्मताविरहरूपता त्वनैकान्तिकस्यासम्भावितैव यत् प्रतिपक्षतायाश्चानवगम्यमानविशेषप्रतिपक्षप्रतिरुद्धतया यत्साध्यनिश्चयाजनकत्वं हेतोः स प्रतिबन्धकसद्भावे कार्य्याजनकत्वमितरकारणसाधारणो वस्तुस्वभावः । तस्य व्याप्तिपक्षधर्म्मताविरहरूपता त्वसम्भावितैव । बाधस्तु साधनवति पक्षे साध्याभावबोधनात्मा भवन्नपि

न व्याप्तिविरहावगमरूपः। सामान्यतोऽनौपाधिकसम्बन्धरूपा हि व्याप्तिः। साधनवति च साध्यविरहो न सोपाधिता साध्याविरोधित्व-भावत्वात्तस्याः। नाप्यसौ सामान्यतः साध्यसाधनसम्बन्धस्य विरहरूपः बाधे सत्यपि सामान्येन साध्यसाधनयोः सम्बन्धस्य दृष्टान्तावगतस्या-नपायापातात् बाधस्य किञ्चिद्विशेषविषयत्वात् सामान्याकारपरिगृहीत-तस्य सम्बन्धस्य विशेषान्तरमादाय पर्य्यवसानाविरोधात्। तस्माद्वि-शेषबाधे न सामान्यतः सम्बन्धस्य सोपाधिता अनुमीयते निरुपाधित्वे बाधानुपपत्तेः। यथाह बाधादौपाधिकत्वं नीयतेऽन्यथा चेति न कश्चि-द्विभ्रम इति। अन्यस्तु सत्प्रतिपक्षवद्बाधस्यापि प्रतिबन्धकत्वमेव तेन बाधे सति प्रतिबद्धत्वान्निश्चयं न करोति हेतुरिति व्याप्तिपक्षधर्मतादोष मनालोच्य अन्यथैव बाधस्य दोषत्वमित्याह। तस्माद्व्याप्तिपक्षधर्म्मता प्रमितत्वानां यत्र साक्षादेव विरहस्योद्भावनं तत्रासिद्धः। यत्र तु व्याप्त्यादिविरहलिङ्गोपन्यासः सत्प्रतिपक्षोपन्यासो वा तत्रान्यो हेत्वा-भासः। ननु सोपाधित्वादयोऽपि यतोऽवगम्यन्ते तत् कुतः पृथक् दूषणं न भवत्यनैकान्तिकत्वादिवत्। नैवम्। अनैकान्तिकत्वादेर्व्याप्त्यादि विरहबोधने लिङ्गभावनियमात् पृथगुपन्यासः। सोपाधितादेस्तु प्रत्यक्षादपि प्रतीतेर्न लिङ्गभावनियतं तत्र प्रतिपादकं किञ्चिदस्ति। न च वाच्यं यत्र लिङ्गात्सोपाधितादेः प्रतीतिरतीन्द्रियप्रभृतिविषये तत्र लिङ्गं पृथगेव दूषणतयाभिधीयताम्। यद्यनैकान्तिकत्वादि-कमपि सार्व्वत्रिकं व्याप्तिविरहलिङ्गमिति हेत्वाभासाधिक्यमापन्न मिति। अनैकान्तिकत्वादिवत्तेषां लिङ्गानामैकरूप्येण निर्द्देष्टुमशक्य-त्वात् पृथक् पृथगेव वाभिधानमशक्यमपरिसङ्ख्येयत्वादिति। वक्ष्याम श्चाग्रे हेतुं तदनभिधानस्य। नन्वनुचितमुच्यते व्याप्त्यादिविरहलिङ्ग-त्वानैकान्तिकत्वादीनां पृथग्दूषणत्वमिति यतो व्याप्तिपक्षधर्म्मतो-पेतलिङ्गप्रमितिसाध्यानुमितिस्तद्वैकल्यान्न भवेत्। यतस्य सा न भवति तदेव तस्यां दूषणं वक्तुं युक्तमिदमनुमित्युत्पत्तिकारणमिह

नास्तीति । नच व्याप्तिपक्षधर्म्मते तत्र मिलिते विद्यमाने तदुत्पत्तिकारणमस्ति व्यतिरेकोपदर्शनयोग्यं तस्मादनुमितिदोषप्रतीतिकारणत्वमनैकान्तिकत्वादीनां नतु साक्षाद्दोषत्वं दोषप्रतिपादकतयापि च दोषत्वं साक्षाद्दोषत्वमनुपजीव्याधिक्याभिधानमिति प्रधानदोषस्यैव दोषतयोद्भावनं युक्तं न सव्यभिचारत्वादीनामिति विभागसूत्रमनर्थकमिति तात्पर्य्यं सत्यमेतत् । साक्षाद्दोषत्वं प्रतिबन्धकस्य व्याप्त्यादिविरहस्य वा विरुद्धत्वादीनान्तु तत्प्रसाधकतया यद्यपि दोषप्रक्षनिक्षेपस्तथापि विरुद्धत्वादयो यद्दोषप्रतिपादकतयोक्ता तदुद्भावनलाघवानुरोधात् व्याप्त्यादिविरहे तत्रोद्भाव्यमाने न हेतुर्गन्तुं शक्यते । अनैकान्तिकत्वादौ तूद्भाविते व्याप्त्यादिविरहोऽर्थाद्गम्यते । व्याप्त्यादिविरहव्यतिरेकेणानैकान्तिकत्वादेरनुपपन्नत्वात् । यथा तस्माद्दीर्घोऽयमित्युक्ते अस्मात् ह्रस्वः स इत्यर्थाद्गम्यते नतु तत्र प्रतिपाद्यान्तरापेक्षा तथेहापि निरग्नौ धूमोऽस्तीति प्रतिपादिते अग्निमानसौ न व्याप्त इत्यर्थाद्गम्यते । नहि सम्भवत्यग्निना च व्याप्तोऽसौ नास्तीति । अतएवानन्त्यादतीन्द्रियोपाध्यादिलिङ्गानां येषां पूर्व्वमनभिधानं समर्थितं तेषामनभिधाने अयमपि हेतुः । तानि ह्युपाधिलिङ्गानि नार्थवशादुपाधिमनपेक्ष्यापि गमयन्ति येन तेषां व्याप्तिर्नावधारिता तं प्रति तत्प्रतिपादनमन्तरेणाप्रतिपादकत्वस्यापि सम्भवात् । अनैकान्तिकत्वाद्यवगतौ च व्याप्त्यादिविरहबोधाय न प्रतिपादनीयान्तरापेक्षा कस्यचित्प्रचेतसः सम्भवतीति पूर्व्वपक्षसंक्षेपः । एवमसिद्धलक्षणे व्यवस्थिते बाधोऽयमभिधीयते । एतेन कीदृगसिद्धलक्षणं व्यवस्थापितमायुष्मता भवति । व्याप्तत्वपक्षधर्म्मत्वाभ्यामप्रमितोऽसिद्ध इति तावत् विरुद्धादिषु लक्षणं किन्नास्ति किं वास्ति । यदि नास्ति तदा व्याप्तिपक्षधर्म्मताभ्यां प्रमिता विरुद्धादयः प्रादुर्भवन्ति । अथास्ति तदा तेऽप्यसिद्धभेदाः प्राप्ताः । अथैतस्मिंल्लक्षणे सत्यपि तेनासिद्धान्तर्भूताः तर्हि लक्षणमिदमतिव्याप्तकमापन्नम् । अथ यत्र व्याप्तिपक्षधर्म्म-

व्याप्तिमत्त्वं साक्षादुद्भाव्यते तदसिद्धमित्युच्यते तर्हि लक्षणान्तरमिद मुक्तं स्यात्। नचैतदपि युक्तं यत्र व्याप्यत्वासिद्धेर्व्याप्तिविरहमात्रं प्रतिपाद्यते तत्र व्याप्तिपक्षधर्म्मताप्रमितत्वानां ज्ञानं नियतं नोद्भाव्यत इति नासावसिद्धः स्यात्। एवं सर्व्वासिद्धविशेषमुदाहृत्य प्रसङ्गो विधातव्यः। अथ प्रत्येकमिदं लक्षणं व्याप्तत्वप्रमिततया साक्षादुद्भाव्यो ऽसिद्धः पक्षधर्म्मत्वाप्रमिततया वेति। तर्हि अन्योन्योदाहरणाव्याप्ते रव्यापकत्वमुभयोः। अथोभयोरप्यसिद्धविशेषलक्षणत्वादन्योन्यविष- याव्यापकता न दोषायेति मन्यसे न सामान्यलक्षणे निर्व्वक्तुमशक्ये कथमिदं विशेषलक्षणमपि घटते। अथानुमितेरसाधारणहेतुव्यति- रेकोद्भावनं सामान्यलक्षणमस्तु। नैवम्। सत्प्रतिपक्षोद्भावनं तथेत्यति- व्याप्तेः अभावरूपतया हेतुविशेषणे च निरुपाधित्वव्यतिरेकोद्भावनाव्याप्तेः स्वरूपासिद्धिः सर्व्वप्रमाणसाधारणो दोष इत्यत्र तदुद्भावनाव्याप्तेश्च। अथोच्यते व्याप्तत्वपक्षधर्म्मत्वाभ्यां प्रमितत्वव्यतिरेको यत्र साक्षादुप- न्यस्यते सोऽसिद्ध इति इदमप्यलक्षणमव्यापकत्वात्। यत्र व्याप्तत्वादि व्यतिरेक उपन्यस्यते तत्र वस्तुगत्या व्याप्तत्वप्रमितेर्व्यतिरेकोऽस्तु नाम नतूपन्यस्यतेऽपि प्रयोजनाभावात्। व्याप्तिव्यतिरेकदर्शनादेवानुमानाङ्ग वैकल्यात्तस्य दोषस्योद्भावनपर्य्यवसानात्। तस्मात्तत्र प्रमितत्वव्यति- रेकोद्भावनं नास्तीत्यव्यापकत्वं दोषः। ननु विशेषणाद्यभावोऽपि वस्तु- तो विशिष्टाभाव एवेति नोक्तदोषः न यदि विशेषणाद्यधिकोऽविशिष्ट स्तदा तदभावभेदोऽपि स्यात्। अथ नाधिकस्तदा विशेषणाभावता ऽन्यथा वा विशिष्टाभावतेति। विशिष्याभावस्यापि तथात्वे पृथगेव विशिष्टाभावतायं तयोरित्यननुगम एव स्वार्थानुमित्यसिद्धाव्याप्तिश्चा- नुद्भावनादिति। अथ ब्रूषे यत्र व्याप्तत्वपक्षधर्म्मत्वप्रमितेर्व्यतिरेकः साक्षात्कण्ठेनोपन्यस्तः तदसिद्धं शब्दोपन्यासत्वस्यानुपन्यस्तेऽपि सम्भवा न्नाव्यापकतेति। नैतदपि युक्तं तथाहि शब्दोपन्यासत्वं किं शब्द स्वरूपनिर्द्दिष्टत्वमात्रम् उत शब्दप्रतिपाद्यत्वम्। आद्येऽनैकान्तिकाद

श्चपि व्याप्तिशून्यत्वं ग्रन्थप्रतिपन्नमवत्येव । द्वितीयेऽपि यदि साक्षादिति प्रत्यक्षेणेत्यर्थः तदा प्रत्यक्षेण प्रमापणीयत्वं व्याप्तिपक्षधर्मताप्रमिति विरहस्य प्रत्यक्षप्रतियोगिकाभावप्रत्यक्षतावादिमते विरुद्धादावप्यस्तीत्यतिव्याप्तिः । अन्यमते न क्वचिदपीति सर्व्वाव्याप्तिः । अथ व्याप्तिपक्षधर्मताविरहस्यापि प्रत्यक्षप्रमापणीयता विवक्षिता सा न युक्ता उक्तलक्षणवाक्यस्य व्याप्तिपक्षधर्मताविरहानभिधायित्वात् तद्विरहेऽपि तात्पर्य्याभ्युपगमे प्रत्येकसमुदितलक्षणताविकल्पेनाव्यापकत्वापातात् । अतीन्द्रियपक्षादिविरहे च विषये तदभावादव्यापकत्वापत्तेः । एतेन यदि लिङ्गानपेक्षत्वं साक्षादर्थः सोऽपि निरस्तः । कथ्यते यत्र व्याप्तत्वपक्षधर्मत्वप्रमितेर्व्यतिरेकः प्रतिपादनीयान्तरानपेक्षतया तत् प्रमापकस्य लिङ्गस्योपन्यासव्यतिरेकेण ग्रन्थोद्भावनः तदसिद्धमिति नैतदप्युपपन्नम् अतिव्यापकत्वात् तथाहि विरुद्धादौ ग्रन्थेते तावद्विपक्षवृत्तित्वरूपभूततर्काभावात् सोपाधितावगन्तुम् । यदाह यत्रानुकूलतर्को नास्ति सोऽप्रयोजक इति तस्याप्येवमप्येवं लक्षणयोगित्वादसिद्धत्वप्रसङ्गः नच तादृशतर्काविषयत्वमपि प्रतिपादनीयान्तरानपेक्षव्याप्तिपक्षधर्म्मताप्रमितिविरहप्रमापकलिङ्गभूतमेवेति वाच्यं तथा सति विरुद्धत्वादिवत्तस्य हेत्वाभासान्तरत्वप्रसङ्गात् । कथ्यते तथोपन्यस्यमानं तदसिद्धमस्तु साध्यविपरीतव्याप्तत्वादिना तु दृश्यमानं विरुद्धाद्येव तत् उपन्यासप्रकारभेदाच्च भेदव्यवस्था हेत्वाभासानाम् । यथाह गोत्वाश्वत्वादिवदत्यन्तासङ्करो दृश्यते । किं नाम प्रमाणप्रमेयभाववत् प्रकारासङ्करमात्रमिति तदप्ययुक्ताभिधानं सुव्यक्तं हि केन प्रकारेणासिद्धत्वम्भवति न तावदुक्तलक्षणेन तथा ग्रन्थोद्भावनस्य विरुद्धोचितप्रकारेणोपन्यस्यमानस्य सम्भवात् । सर्व्वथा निष्प्रकारस्यासिद्धधर्मिणस्तदुद्भावनाशक्यत्वात् । नच तथा ग्रन्थोद्भावनत्वमप्युद्भाव्यते असिद्धे येन प्रकारभेदव्यवस्थितिरनेन भवेत् । नच ग्रन्थोद्भावनपदस्थाने उद्भाव्यमानत्वमिति कृते निस्तारः सोपाधित्वाद्यु-

द्भावने प्रमित्यभावोद्भावनं व्यर्थत्वान्न क्रियत इति तदव्यापकत्वं प्रसज्ये-
तेति प्रागेवोक्तत्वादिति । एतेनासिद्धः साध्यसम इति प्रत्युक्तं यथाकथ
ञ्चित्साध्यसाम्यस्य सर्व्वसाधारणत्वात् साम्यविशेषस्य चोक्तप्रकारपर्य्यं-
वसानव्यतिरेकेणान्यस्यासम्भवात् भङ्ग्यन्तरेषु चोक्तदूषणप्रकारा
यथासम्भवमिह योजनीया इत्यलं विस्तरेणेति ।

अपि चासिद्धलक्षणविशेषणेन प्रमाणव्यवच्छेदकव्यतिरिक्तेन यद्य-
वच्छेद्यं किं तत्केनचिद्विरुद्धं केनचिदन्यदिति चेत् । विरुद्धमेव कि-
मुच्यते तथाहि साध्यविपरीतव्याप्तो विरुद्ध इत्याहुः तत्र साध्यव्यतिरे-
केण हि व्याप्तिः कार्त्स्न्येन वा अनौपाधिको वा स्वाभाविको वा सम्बन्ध
इत्याद्युक्तिभिः सविशेषणः सहभाव एव निरुच्यते । तथा सति च
साध्यव्यतिरेकेण सामानाधिकरण्यमेव विशेषणविशेष्ययुक्तं विरुद्ध-
मित्युक्तं स्यात् । यदा चैवं तदा साध्यव्यतिरेकसामानाधिकरण्यमेव
हेतोरगमकत्वे समर्थमिति तन्मात्रमुद्भाव्यं वृथा विशेषणप्रक्षेपः । तथा
चानैकान्तिक एवायं स्यात् । ननु साध्यव्यतिरेकसम्बन्धो यद्यपि विरुद्धा-
नैकान्तिकयोर्द्वयोरप्यस्ति तथापि वस्तुगत्या स्वाभाविकोऽसौ विरुद्ध
एवेत्येतावन्मात्रविशेषविवक्षया विरुद्धस्यानैकान्तिकाद्भेदोपन्यासः ।
मैवम् । दुर्ज्ञानत्वात् वस्तुगत्या सन्नप्ययं विशेषो नोद्भावनार्ह इत्यु-
पेक्षणीय इत्युक्तम् । तथाहि नेदमस्य साधकमेतत्साध्यं प्रति विरुद्ध-
त्वादित्यभिधीयमाने विरुद्धशब्दार्थनिरुक्तौ विशेषणाधिक्यस्योक्तन्या-
येन दुष्परिहरत्वात् । अत एवानैकान्तिके सन्देहेन प्रत्यवस्थानं विरुद्धे
तु व्यतिरेकनिश्चयेनेति विशेषादनयोर्भेदेनोपन्यास इत्यप्यनवकाशम्
अनुमितिहेतुव्यतिरेको हि हेतुदोषोऽनुमितिहेतुश्चैको व्याप्तिस्तस्तद
भावस्य दोषत्वात्तावन्मात्रं ज्ञाप्यं तच्च हेतुविपक्षसम्बन्धोद्भावनमात्रा
देव गम्यते तस्मादनुमितिहेतुव्याप्तिप्रमितिव्यतिरेकबोधनाय संशये
व्यतिरेकनिश्चये वोद्भाव्यमानेऽपि कुतस्तद्विवेकस्य च विपक्षसम्बन्धमात्र
नियततत्सम्बन्धावबोधोपन्यासस्याविति तत्सम्बन्धमात्रमेवास्तु व्याप्तेस्तत्र-

सितेश्च व्यतिरेकस्य सिद्धत्वाद्धेतुत्वं तावन्निश्चयान्यमिति । यथान्येन
प्रयोगे तेनैवोक्तं कारैः । कालविषयविशेषणमिदमनवच्छिन्नमिति किंविशेषु
संख्याज्ञानमवत् प्रत्यक्षेऽविवादमित्यादि । अर्थोपदर्शनप्रतिपादनमत्र नेदं
घटते तत्र तेषामसतामर्थविषयतयाऽपि यदप्रयोगे विशिष्टबोधने ना
न्यथासिद्धानां प्रत्यक्षेण तथा तथाऽपि व्यतिरेकिविज्ञानमन्तरेण
प्रत्यक्षविषयत्वं तदानैकान्तिकसाधारणादेः अन्यदेशादेर्वा साधार-
णादेवेति । अनैकान्तिकत्वमनुक्त्वा यदा पक्षधर्मत्वं वा विपक्षम-
प्रयोज्यकत्वमप्यवधिगमस्येति तदुपदर्शितस्य दृष्टान्तदूषणं विपक्ष
प्रतिपादनं विशेषाधारमत्र विना विशिष्टप्रतिपादनस्य विधिरसमर्थ
ता । [illegible] विशेषणस्याप्यविशेषकत्वात् विशेष्यस्य सा-
मर्थ्ये [illegible] । तथा [illegible] साधारणानैकान्तिकत्वमिति
[illegible] साधारणेति विशेषणेन सपक्षविपक्षयोः [illegible] सपक्षमात्रवृत्ते-
[illegible] एवमसाधारणोऽपीति [illegible] अनित्यत्वादिति । अनित्य
विशेषणे [illegible] अनित्यमिति [illegible] सर्वस्य
[illegible] अनित्यस्याभि-
धानमिति । विरुद्ध साध्यविपरीतेति साध्याभावेनार्थे यदा अभावात्मैव
साध्यं [illegible] भावात्मकस्य [illegible] ।
तत्र विपरीतशब्दस्य विरोधिसामर्थ्ये भावाभावोभयवाचित्वमिति
वाच्यं [illegible] भावाभावयोर्विरोधोऽभ्युपेयते [illegible] अनवस्थानम्
संसर्गनिषेधः तत्र भावाभावयोरन्योन्यस्यानवस्थानमेव । [illegible] प्रति
षेधरूपत्वात्तयोः तथा च सति भावाभावयोः [illegible]
प्रत्येकमन्यतरस्मिन् [illegible] इति । [illegible] भावाभावयोर्वि-
रोधनिवृत्तिनिराकरणमनुपपन्नादिति ।

विरुद्धव्यपदेश [illegible] विशेषेण किं व्यवच्छेद्यम् अनैकान्तिकमिति
चेत् किं तदनैकान्तिकं तथाहि । अनैकान्तिकः सव्यभिचार इत्युच्य-
ते [illegible] व्यभिचारस्य [illegible] यदि विपक्षवर्त्तिता तदानीं विरुद्धेऽपि प्रसङ्गः

असाधारणानैकान्तिकाद्वाभिन्न । अथ सपक्षविपक्षव्यावृत्तत्वमभिमतं तदा
साधारणोऽपि हेत्वाभासापत्तिः । अथोच्यते सव्यभिचारत्वं सपक्ष
विपक्षव्यावृत्तता अभिप्रेता सा चान्वयेन साधारणस्य व्यतिरेकेण
असाधारणस्यानैकान्तिकस्य संग्राहिका सपक्षविपक्षसाधारण्यमात्रं
त्वन्वयेन व्यतिरेकेण वेति विशेषस्तया न विवक्षिता अतः साधारणा
साधारणानैकान्तिकयोरुभयोरपि संग्रहः । नित्यः शब्दः आकाश
सम्बन्धित्वादित्यादेरनुपसंहार्यस्यापि सपक्षविपक्षशून्यत्वादेव सपक्षविपक्ष
व्यावृत्ततामात्रेण संग्रहमिति । विचार्यमेतद्व्याख्यानं परन्तु तावदसा-
धारणः सपक्षाद् व्यतिरेकेण सपक्षसाधारणतायाः सपक्षव्यापके सद्धेतौ
धूमविशेषादौ गतत्वेनातिव्याप्तत्वं यदि तस्य दोषस्य परिहारार्थं
सर्वविपक्षसपक्षसाधारणमनैकान्तिकमिति ब्रूषे । तदा व्यतिरेक
मात्रेण सर्वसपक्षविपक्षसाधारणता धूमानुमानादिगामिनी न भवतु
नाम । अन्वयेन तु सर्वसपक्षविपक्षसाधारणता विपक्षैकदेश
गामिनं साधारणमनैकान्तिकं शब्दो न नित्यः प्रत्यक्षत्वाद्घटवदि-
त्यादिकं न संगृह्णातीत्यव्याप्तिर्व्यक्तैव तावदपरं प्रश्नयते । अपि
चान्वयव्यतिरेकाभ्यां सर्वसपक्षविपक्षगामित्वेऽनुमानादौ समस्त
प्रसङ्गः विशेषणयोरविवक्षितत्वात् । किञ्च सर्वसपक्षविपक्ष
साधारणमनैकान्तिकमिति शक्यं यदि सर्वेषां विपक्षाणामेव विशेषणं
तदा विपक्षैकदेशवृत्तेः सपक्षव्यापिनः साधारणानैकान्तिकस्य असंग्रहः
कार्यत्वस्यानित्यत्वे प्रमेयत्वादित्यादेरव्यापकत्वादसंग्रहः । अथ
सर्वेऽपि न विपक्षस्य विशेषणं तदा व्यतिरेकमादाय विपक्षसर्वसपक्ष
साधारणमनैकान्तिकमिति एतद्विपक्षैकदेशवृत्तिः सद्धेतौ विरुद्धे विशेषि
नित्या सावयवत्वादित्यादौ गतत्वादतिव्याप्तिरनिवार्या । भोः चेयं वाचो-
युक्तिः सपक्षविपक्षसाधारणमनैकान्तिकमित्युक्ते सर्वं संगृह्यते अन्व-
येन व्यतिरेकेण वेति यावदनुपसंहार्यस्यासपक्षविपक्षस्य सपक्षे वि-
पक्षे वा अन्वयेन व्यतिरेकेण वा साधारण्यं स्यात्तयोरेवाभावात् । यदि

च सपक्षे च विपक्षे च साधारणत्वमुभयत्र सत्त्वमनुगतं विवक्षित-
सत्त्वाभावमसाधारणानैकान्तिकाख्यामि । अथोभयत्र सत्त्वमनुगतं
तद्विवक्षितं तदा सर्व्वाख्यातिः तदसत्त्वस्यातद्धर्म्मत्वात् । अथ तदुभय-
वर्त्तिभावप्रतियोगित्वं तदुभयसत्त्वस्य योऽभावस्तदाश्रयत्वं वाभि-
प्रेतं तदापि साधारणोदाहरणाख्यामि । अथ सर्व्वपि तदुभयसाधा-
रण्यं नाम एकस्मिं स्वरूपं हेतोः सत्त्वमेकत्र वा तदपि
यत्र दुष्यते तथा सति साध्यान्यकतादोषः इति । नैवम् । मुख्यस्वावदन-
न्यथानेऽपगच्छते हेतोरैकान्त्यस्य सपक्षविपक्षयोरन्यतरति । किं नाम
अन्यथवर्त्तिहेतोरन्तरान्यथाथिनि स्यात्तदा सासाधारणाख्यातिः तत्र
सपक्षे विपक्षे च हेतोरसत्त्वेन तदाश्रयत्वासम्भवात् । तस्मात् सपक्षे
विपक्षे च आधारत्वं हेतोरनैकान्तिकत्वमित्यनुपपन्नमेव यस्तत्र पक्षे
हेतोस्तदाश्रयत्वानुपपन्नः सपक्षे विपक्षे चेति असाधारणोऽनैकान्त्य
सङ्कुलत्वात् । तदसाधारणेऽपि च्युतत्वमेव हेतोः तदाश्रयत्वे
किमयाकार् कथान्तु वा विविक्तं तथापि साधारणोदाहरणेषु हेतु-
भावापेक्षया सपक्षविपक्षयोर्न्नाश्रयता सत्त्वार्थः किन्तु हेत्वपेक्षयैवेति
स्वकार्यं तदर्थं वस्तुयितुं तत्त्वस्य साध्यासाधारणतापत्तिरेव । किञ्च स-
पक्षविपक्षसाधारणत्वं यदि सामान्यतोऽभावाः साधारणासाधारणा-
नैकान्तिकभेदद्वयसंग्रहार्थमुच्यते तदा सपक्षविपक्षयोरन्यतरादिभि-
र्हेतोः साधारण्यमसाधारण्यमित्यतिव्याप्तिः । अथ नित्यानित्यपरिशिष्टे
यान्यथाव्यतिरेकाभ्यां सपक्षविपक्षसाधारणत्वमनैकान्तिकमित्युच्यते तदा
अन्वयव्यतिरेकयोः प्रत्येकं निश्चितविकल्पानुदयस्वात् व्याप्यत्वासिद्धेः ।
स्यादेतत् स्वाभावविरोधाश्रयानिश्चितसपक्षविपक्षत्वं सपक्षविपक्षसा-
धारण्यं विवक्षितमेव साध्यासिद्धिर्व्याप्तिरिति तदप्यसत् । तथाहि
तावत्सर्व्वपदेर्विरोधप्रतिपादनमनुपादानपदे तादात्म्यतः सर्व्वप्रवृत्ति-
पादाने धूमादनुमानादौ प्रसङ्गश्च । स्वाभावविरोधप्रवृत्तेर्व्यापक-

[illegible] भावयोर्द्वि विरोध [illegible] प्रतिषेधो [illegible]

[illegible] । [illegible] किन्तु

तदेव [illegible] भावविरोध [illegible] नाशैक्यं [illegible]

[illegible] भावविरोध [illegible] वचनं [illegible] ।

[illegible] विरोध [illegible] विशे-

[illegible] अनुपपत्तेः [illegible]

[illegible] विपक्षे [illegible]

[illegible] भावविशेषितस्य तु विरोधस्य

[illegible] ।

[illegible] भावोपलक्षितो विरोधोऽभिमतः तेन विशेषण [illegible]

[illegible] अतः [illegible] भावाभ्यां विरोधमात्रं वा [illegible]

[illegible] । आद्ये [illegible] भावाभ्यां [illegible] विरोध

[illegible] भावप्रदेशाद [illegible]

[illegible] । अथ द्वितीय [illegible] विरोधस्य [illegible]-

[illegible] । [illegible]-

[illegible] विरोध [illegible] किन्तु

[illegible] । प्रथमे तदे-

[illegible] । अथ [illegible] विरोध [illegible]

[illegible] तथैव

[illegible] सर्वं [illegible] प्रत्येक

[illegible] । [illegible]

[illegible]

[illegible] भवतीति [illegible] हेतौ [illegible] अपि [illegible]

[illegible] अपि

[illegible] । अथ [illegible] तथापि [illegible]

त्वात् पक्षस्य निश्चितत्वादेव सपक्षस्य वृत्तेरभावात् । व्यभिचारि नैकान्तिक त्वं यद्यपि स्यात् । अथ पक्षव्यतिरिक्ते इति विशेष्यते पक्षेऽपि तदानी मयं गृह्यतां तस्यानुपपत्तेः । न हि पक्षव्यतिरिक्ते सपक्षे विपक्षे वा सम्भवतीति सपक्षस्य विपक्षस्य च कुतश्चिद्व्यावृत्तौ विशेषणमेतद् तयोः कथं घटते । अथ पक्षव्यतिरिक्ते वर्त्तमान इति विशेष्यते तदानीमसाधारणमव्याप्तिः नासौ पक्षव्यतिरिक्ते वर्त्तमानः । अथ पक्ष व्यतिरिक्तेऽपि विशेषणमुपादायेत तदापि पक्षव्यतिरिक्ते इति पक्षविरुद्ध रूपस्यापन्नत्वादितुल्यं वा इयमपि पक्षत्रयवृत्तेरसाधारणस्यानैका- न्तिकेन सम्भवति पक्षविपक्षयोः समानत्वादेव । निश्चयविशेषणत्वे तस्य सन्देहे गमनं स्यात् । एतेन पक्षविशेषपक्षान्तरेऽव्याप्ति- र्विशेषणमित्यभिधानमपास्तम् । अथ यदि पक्षव्यतिरिक्ते वर्त्तते तदा स- पक्षएव विपक्षएव न वर्त्तते कथं नैकान्तिकः तथा सत्यसाधारण स्यापि व्याप्तिः । सन्देहोऽपि प्रसक्तिरिति चेत् तदा भ्रान्तोऽसिद्धम् एवं सति गोमयस्यापि संग्रहः । अथ साध्याभावे यदि पक्षव्यतिरिक्ते वर्त्तते इत्येतन्न सम्भवति तत्र पक्षाभावे कदाचिदपि पक्षव्यतिरिक्त वृत्तित्वस्यानुपपत्तेः साध्याभावेऽपि निश्चितसपक्षविपक्षवृत्तेः यद्वै न पक्षादन्यदपि पक्षव्यतिरिक्ते वर्त्तते इति कश्चित् निश्चितसाध्याभावायां विशेषायां प्रयुज्यते यदि विपक्षपाठकः स्यादिति तत्रस्य हेतोः संग्र होऽपि स्यादिति तस्यैकदेशस्य कोटेः तदाश्रये निश्चितसाध्यप्रदर्शनार्थं मसिद्ध्यसाधारणं यदीति प्रयुज्यते । ननु निश्चितएव वस्तुनि तस्यासा- धारणानैकान्तिकसंग्रहार्थं यदीत्यनुपपन्नं यतश्च साधारणस्यापि सम- ग्रहीतं । अथ विपक्षस्य सपक्षएव वर्त्तते न पक्षे हेत्वाभासः सोऽनैका- न्तिक इति लक्षणं मन्यसे तदप्यनुपपन्नम् अनैकान्तिकत्वनिश्चयाभाव एव हेत्वाभासत्वं तत्र सर्वत्र हेत्वाभासकत्वं सिद्धमिति कथं तद् नैकान्तिकानैकान्तिकस्य । अथापि हेत्वाभासत्वं नाम यद्भवति तदा पक्षस्य दुरवधारणत्वं विशेषणमपि हेत्वाभासत्वस्यावधारणात्

[illegible] ... यदि ... तर्हि ... [illegible]

दर्शितयोः कथं तिर्यगितिविशिष्टत्वदोषेण निराकर्तुं शक्यमिति । सपक्षेणा-
न्वयित्वे सति तदभावाचासावनैकान्तिकत्वमपि न, साध्यविशिष्टोपि-
गतत्वात् विशेषविशिष्टसाध्यस्य व्याप्यत्वावगमाच्च । साधनेन व्याप्ता-
सिद्धिरेव विपक्षेत्वात् सर्वं स्यात् विशेषणांशस्य वैयर्थ्यात् पक्षधर्म-
त्वाभावं च पश्यन्नपि तत्प्रसिद्धयप्रसक्तानुपपन्नं वाचयति तद-
भावत्वादनुपपन्नत्वादिति वा तस्यावसायित्वासिद्धत्वादव्यापकत्वे
शब्दोऽनित्यः कोऽयं विशेषगुणत्वादित्यादावसाधारणो व्याहतत्वात् ।
वस्तुतः साध्याभावे तत्कालेपि सत्प्रतिपक्षतया अनिश्चितसाध्यकार्य-
के प्रमाणमनुमानं । एतेनानैकान्तिकः सव्यभिचार इति प्रत्युक्तं
वेदितव्यं कथं भिन्नस्य प्रमाणान्तरस्य नित्यत्वमनुमानादिति ।
अभिधेयानावश्यकविरोधेन प्रमाणव्यवच्छेदकान्यत्र किं अनन्वयं
केनचित्सत्प्रतिपक्षः केनचिदन्यदिति चेत्

कः पुनः सत्प्रतिपक्षः । यथाहि सत्प्रतिपक्षलक्षणमनुयुक्तो यथा
समानबलेन बोधितसाध्यविपर्ययो हेतुस्तेनाभिमतः सत्प्रतिपक्ष इति
तत्र तथाहि किंचिद्वक्तं विवक्षितं सामर्थ्यमिति चेत् तत् कुत्र
कार्येऽभिमतं न तावत्सर्वस्मिन्नेव कार्ये सत्प्रतिपक्षहेतोर्भिन्नविषय-
बुद्ध्यादिजनकतया सर्वकार्ये समसामर्थ्यतायाः असम्भवात् । नापि
यत्र क्वचित् कार्ये प्रमाणसाध्यं प्रति प्रतीयमानासिद्धत्वादिदोषेणापि
प्रमेयत्वप्रतिपादनादौ सामर्थ्येन प्रतिहेतुना सत्प्रतिपक्षत्वप्रसक्तेः सर्वं
हेतूनां व्यभिचारादसमहेत्वाभासत्वापत्तेः । नापि पूर्वं हेतुसाध्याभाव-
बोधनरूपे कार्ये असमर्थहेतोरेवासत्प्रतिपक्षत्वे स्वसाध्यसाधकतापत्तेः
प्रतिहेतोरिति चेन्न तत्र तत्र सिद्धेरेवसामर्थ्यादिव समप्राप्तिकत्वानुप-
पत्तेः इत्यमेव न हेतुसाध्यविपर्ययबोधनेपि । अथोच्यते स्वकीय-स्व-
कीये प्रमाणसाध्ये यत्र प्रत्यक्षविपक्षान्यतरविषयव्याप्तत्वाबाधितत्वसत्त्वं
सत्प्रतिपक्षहेत्वोस्तुल्यं तदभिप्रायेणेदं समबलत्वाभिधानं तेनेदमुक्तं
भवति प्रत्यक्षपक्षसपक्षविपक्षव्याप्तत्वाबाधितविषयत्वैस्तुल्येन बोधित

साध्यव्यतिरेकः सत्प्रतिपक्ष इति चेत्तदपि न युक्तम् । प्रतीयमानाभासाभि-
ह्वाटेऽपि प्रतिहेतुना सत्प्रतिपक्षत्वप्रसङ्गात् । किं चापि पक्षे सर्वेण
तस्य पक्षस्य स्वभावात् । [illegible] भागासिद्धेनापि सत्प्रतिपक्षत्वं
प्रतीयमानेनानैकान्तिकेनापि तथा सति सत्प्रतिपक्षतस्यैवाभ्युपेतो
[illegible] विशेषात् । न च सर्वं पक्ष इति कृते नायं दोषः इति
वाच्यं अन्यत्र पक्षप्रतिरोधे तत्र सत्प्रतिपक्षस्यापत्तेः । तत्र
पक्षस्य [illegible] भावादेव सर्वस्य [illegible] नियमेन [illegible] नुपपत्तेः
[illegible] विशेष [illegible] । किं चान्वयव्यतिरे-
किणः केवलव्यतिरेकिणा केवलान्वयिनः [illegible] व्यतिरेकिणा सत्-
प्रतिपक्षे [illegible] नास्ति [illegible] तुल्यतावाभावात् ।
अथ [illegible] तुल्येनेति [illegible] तदनुरोधेन [illegible] तथा सत्य
साधारणानैकान्तिकतया विशिष्टेनापि सत्प्रतिपक्षत्वप्रसङ्गात् । तथा
[illegible] व्यतिरेकिणा केवलव्यतिरेकिणः केवलव्यतिरेकिणा केवलव्यतिरे-
किणः सत्प्रतिपक्षता [illegible] नापीति नियमोऽभ्युपगन्तुं शक्यः उभयो
[illegible] भ्यमानत्वे [illegible] दोषस्य [illegible]-
विशया [illegible] भ्रान्तिरिति तु [illegible]
प्रतिपक्षत्वे [illegible] केवलव्यतिरेकिणान्वयव्यतिरे-
किणोऽन्वयव्यतिरेकिणा च केवलव्यतिरेकिणः प्रतिरोधे [illegible] सामर्थ्यस्य
[illegible] त्वात् । [illegible] तु सत्प्रतिपक्षत्वस्य दोषत्वाभ्युपगमे मूर्खं [illegible]
[illegible] प्रतिरोधिनः सति न भवितुमर्हतीति । [illegible]
पक्षान्तपक्षा [illegible] बाधितसाध्यं विप
र्ययः [illegible] इति न निरस्तत्वात् । पक्षप्रदेशे सर्वं [illegible]
[illegible] केवलव्यतिरेकिण्यपि [illegible] भावात्
[illegible] बाधितसिद्धभेदः [illegible] बाधितस्य । [illegible] नापि
सर्वं [illegible] तेनापि सत्प्रतिपक्षता स्यात् । अथ
[illegible] विरुद्धानैकान्तिकबाधितनियमलक्षणेन [illegible] बाधितसाध्या

सत्त्वः प्रकरणसममिति नैतदपि युक्तम् व्याप्ततोऽस्फुरद्दोषेण वस्तु-
गत्या ह्यासिद्ध्यादिदोषवत्त्वात् सत्प्रतिपक्षतास्वीकारात् तदुद्भावनात् ।
किञ्च विरुद्धार्थयोरनयोः सत्प्रतिपक्षत्वे कस्यैकस्यान्यतरस्यासिद्ध्या-
दिदोषेण भवितव्यम् अन्यथा धर्मिणो विरुद्धधर्मद्वयसम्बन्धप्रसङ्गात् ।
तथैकस्य व्यवच्छित्तिदोषाणामन्यथात्वप्रतिहेतावप्यसिद्ध्यादिदोषाशङ्काया
आपत्तिर्यथासिद्ध्यादिहीनेनेति सन्दिग्धानैकान्तिकत्वात् सद्धेतुत्वस्य
दुरवधारणत्वम् । अथ बाध्यं किमर्थं सत्प्रतिपक्षहेत्वोरन्यतरस्यासिद्ध्या-
दिकमवश्यमभ्युपेयं सत्प्रतिपक्षत्वस्य दोषत्वादेव तयोर्न धर्मिणो
विरुद्धधर्मसम्बन्धापत्तिरिति चेत्तदिदं दुष्टं हेतौ व्याप्तेः पक्षधर्म-
ताया वाऽभावेन भवितव्यं तस्याभ्युपगमे साध्यस्य वाऽभ्युपगम-
प्रसङ्गात् । व्याप्त्यादीनामप्युपाधिव्यभिचारादिभङ्गेनैव पर्यव-
सानात् । सत्प्रतिपक्षत्वादुद्भाव्यमानेऽपि व्याप्तिपक्षधर्मताभङ्गे । न
विशिष्य कस्मिन् हेतौ निश्चेतुं शक्यः अन्यतरस्य व्यभिचारादिभङ्गेनापि
सत्प्रतिपक्षत्वस्योपपत्तेः अतोऽविशेषनिश्चयतया तदुभयत्र स्थिते यदि
साध्यादेवाध्यवसीयते तदानीमसिद्धिः । अथ निश्चितोऽनुमीयते तदानैका-
न्तिकादिरन्यतमदूषणं वस्तुगत्यास्ति सत्प्रतिपक्षे तत्तद्धर्मासिद्ध्याद्यन्य-
तमस्याभ्युपेयं तत्र अस्मात्तस्य दोषस्य कुत्र हेतोर्वैयर्थ्यं इत्यत्र भवति
चानिश्चयो प्रतिहेतावपि तथाभावात् तस्यासिद्ध्यादिहीनेनेति व्यव-
स्थापकस्य दुरवधारणत्वं दुष्टत्वमिव स्यादिति तत् । अत्र नन्वसिद्ध्या-
सिद्ध्यादिहीनत्वस्यानिश्चयः संशयोऽपि तादृशस्य सत्प्रयोगेन प्रसिद्धिसत्
प्रतिपक्षतादोषस्वत्वादिनानुमानस्य प्रतिबन्धकत्वं दृष्टमनुमानस्य प्रतिरोधावि
हितसिद्धिर्वा । नन्वत्र यथासिद्ध्यादिशङ्कामपनीय सत्प्रतिपक्षतादि-
भङ्गादोषः स्यात् सैव तदा दोष इति वाच्यम् असिद्ध्यादिशङ्काया एव
तादृशप्रतिहेतुदर्शनमूलकतया तदुपजीवकत्वादिति । नैवम् । यतः
प्रतिरोधादिनाऽसिद्धेर्भाविन्याः सत्प्रतिपक्षता प्रसज्येत । ननु भवत्येव
तथापि तेन विना भवेत् तस्यासिद्धतया हीनबलस्य सिद्ध्यादिनता

पक्षबाधं विधूय न किञ्चिदस्ति । बाधादेव तर्हि न तेन सत्प्रतिपक्षता-ऽस्तीति चेन्न अन्तिकासिद्धतया सत्प्रतिपक्षहेतोरपि तर्हि कथं परहेतोः साधकत्वप्रसाधकत्वं भविष्यति हेत्वाभासत्वाविशेषात् हेत्वाभासा-न्तरं च दोषसंशयापादकमिति निवक्ष्यति चेन्न तर्हि । प्रकृताधिमात्राथ न्यूनबलस्या बाध्यता, समानबलत्वे तथापि च उभयोर्दोषसंशयप्रसक्त्या-देव । किञ्च प्रतिपक्षितत्वनिश्चयाभावे संशयानुपपत्तिः । अथान्य-थाकारं पराजयमभिधत्ते असिद्धविरोधव्यभिचारकालात्ययापदेशवि-रहिततया प्रतीयमानेन बोधितोऽयं दोषस्य बाध्यस्य विपर्य्ययस्य प्रकारः सम्भवति एतदपि विचारासहं केन तथा प्रतीयमानत्वमभिमतं किं प्रत्यनुमानप्रयोक्त्रा अथ प्रथमानुमानवादिना द्वाभ्यामपि वा येन केन चिद्वा । न तावदाद्यः स्वयं दोषं जानतोऽपि दूषणान्तरपरिस्फूर्त्तौ यद्ययं दोषं न प्रतिसन्धास्यति तदाभीष्टमेव अथ प्रतिसन्धास्यति तदानीमन्यथापि ममास्फुरद्दोषान्तरस्य पराजयो भवेत् कथान्तरा-रूढायां कथायां शाखान्तरं वा सङ्क्रमितुमवकाशमासादयिष्यामी-त्यभिप्रायवतोऽस्य प्रकृतस्य मयि दत्त्वा तत्प्रयोगोऽपि भविष्यतीति लोके प्रकर्षदर्शनार्थं स्वयमपि ग्रन्थकारादिभिरुक्तस्य वा तथाविधप्रतिहेतो-र्निर्व्याहरणेऽनुयुक्तस्य प्रौढप्रश्नस्य स्फुरद्दोषेणापि प्रतिहेतुना सत्प्रतिपक्षीकरणादर्शनात् । तत्र परेण दोषानुद्भावने जयस्याप्यभावात् । किञ्च प्रतीयमानता यदि निश्चीयमानता विवक्षिता तदानीमसम्भव एव यतो विरुद्धार्थयोरेकत्रावश्यं दोषः स च नास्तीति निश्चितं तदा निर्द्धार-यितुमशक्यतया प्रतिहेतावपि तदभावात् । अथ सम्भावना प्रतीयमा-नता तर्हि तदुद्भावनसम्भावनां दूषयन्तो वक्तव्यामस्तदेव दूषणमभिदिदृक्षम् । नापि द्वितीयस्तृतीयश्चतुर्थो परबुद्धेर्दुरवधारणतया प्रत्यक्षासिद्धप्रादि-विरहिता बुद्धिरत्र भविष्यतीत्यनेनावधारयितुं परमानुमेयानामशक्य-त्वात् कथं सत्प्रतिपक्षतां प्रतिज्ञाय कुर्य्यादयम् । प्रसङ्गान्तरं चात्र निर-सिष्यामः एतेनासिद्धविरोधकालात्ययापदेशव्यभिचारवचनयोग्याति

पक्षधर्म्मता विरुद्धकथा च मूर्त्तत्वेन बाधितसाध्यविपर्य्ययः सत्-प्रतिपक्षइति निरस्तम् । केनामूर्त्तत्वाभावत्वमिति निर्व्वचनाशक्यत्वात् । किञ्च सर्व्वेषामेवैषां अन्तःपातां धर्म्मत्वादिप्रतिकोनुमानबाधितेपि गतत्वादतिव्यापकत्वन् एतेन साध्यानुमाने तदाभासे वा सत्प्रतिपक्षस्य दोषत्वमपोदितम् । अथोच्यते अमूर्त्तत्वाभावविशेषितं बाधितसाध्यविपर्य्ययः प्रकरणसम इति । अस्तु तावदमूर्त्तत्वाभावमित्यादि किमन्य दोषाभिधानं यदि वा कश्चिद्विशेषेणैव विशेषणत्वेनाभिप्रेतत्वेन तद्-रुपत्वं क्वचिदपि नाप्नोति अर्थ्यविधि । अथ हेतुदोषत्वं तेषां विशेषोऽभिमतः धर्म्मत्वादिप्रतिकानुमानबाधितेपि गतत्वादति-व्यापकता अमूर्त्तत्वाभावहेतुदोषरूपविशेषेण बाधितसाध्यविपर्य्ययत्वा-पत्त्यापि तत्र हेतुदोषत्वाभावादेवामूर्त्तत्वाभावविशेषणत्वात् । न चामूर्त्त-त्वाभावपदार्थविशिष्टहेतुदोषरूपविशेषणेति चेत् निरूपणाभावात् सति सत्प्रतिपक्षहेतुकः सत्प्रतिपक्षो न व्याप्यते । परकार्यतत्त्वलक्षणेति च दर्शनीयं न ज्ञेयमिति च महती प्रथा । न चामूर्त्तत्वाभावहेतुदोषहेतु गुणरूपविशेषमेति विवक्षिते निरूपणे व्यतिरेकिणान्वयव्यतिरेकिणा सत्प्रतिपक्षे हेतुगुणरूपो विशेषः समप्रारूप्यसद्भावामूर्त्तत्वस्य ति सद्-व्यापकत्वापत्तिः । अथामूर्त्तत्वाभावमात्रं तद्धर्म्मत्वभङ्गाभङ्गरूपत्वविशे-षोति विद्यते तदा प्रत्यक्षं किमपेक्ष्य विशेषत्वमिदमिष्टं यदि प्रति-ज्ञादपेक्ष्य तदा प्रसिद्धासिद्धत्वादिरूपं हेत्वाभासमपेक्ष्य विशेषात्-त्वे तदनुमानात्मके प्रतिपक्षत्वमिति पक्षाश्रयप्रमाणम् । अथ पक्षत्व विरोधित्वं हेतुसमत्वं तदा च तुल्यबलत्वमीदृशं मध्यं वस्तुनि । व्याप्ति पक्षधर्म्मतात्मकत्वाभावरूपस्य प्रकरणहेतोः रूपस्य विशेषो न मूर्त्तत्वे तेन बाधितो न दोषत्वाभावातिरेकः न प्रकरणसम इति दृढतममवेत-ह्यत्वं निरूपणमेव तथा हि व्याप्तिपक्षधर्म्मतेति निश्चितस्य भङ्गा-भङ्गपदसम्बन्धे विवादिके प्रत्येकोदाहरणात्मिका इति तत्र भङ्गाभङ्ग

स्वरूपस्य च मिलितस्य विशेषणदलस्याभेदेऽपि स्फुटे सर्व्वथा अस-
म्भावितया सर्व्वांशानामपि अपि चैवमस्य वाक्यस्यार्थोऽवगन्तव्यः व्याप्ति-
भङ्गरूपो व्याप्यभङ्गरूपः पक्षधर्म्मताभङ्गरूपः पक्षधर्म्मताभङ्गरूपश्च
प्रकृतहेतुदोषविशेषो न गृह्यते यस्य हेतु बाधितो [illegible]-
देशः स प्रकरणसमः तथा सति परमाणुर्निरवयवो [illegible]परि-
माणतारतम्यविश्रान्तत्वादाकाशवदित्युक्ते परमाणुः सावयवो मूर्त्त-
त्वात् घटवदिति प्रत्यनुमानेन प्रतिरोधे हेतुना परमाणुः [illegible]-
[illegible]परिमाणतारतम्यविश्रान्तिभावः [illegible] परिमाणतारतम्यविश्रान्तिभाव
त्वात् [illegible]परिमाणतारतम्यविश्रान्तत्वादित्यादेः सदनुमानत्वेऽपि पक्ष
धर्म्मताभङ्गेन तदीयनिरवयवत्वेऽपि प्रत्यक्षताभङ्गस्य [illegible]
स्यात्। यथास्य सदनुमानतां न मन्यते स प्रत्येकं पार्श्वे [illegible]-
[illegible] शक्नोति तेन [illegible] अत्र कोऽपि तथाप्येव तस्य [illegible]-
[illegible] [illegible] [illegible] तदर्थं स प्रवृत्तः [illegible]
इति [illegible] [illegible] तथाप्यनुपपत्तिः [illegible] किं यदि यस्य न [illegible]
इति [illegible] [illegible] न [illegible] [illegible]
[illegible] दोषत्वाद्धि यत्र द्वयोरपि हेत्वोः परस्परं [illegible]
व्याप्यत्वादिभङ्गः [illegible] तत्र नास्त्येव [illegible]
नहि तत्र व्याप्यत्वादिभङ्गो विशेषोऽपितु प्रकृतहेतुना [illegible]
एव। ननु [illegible] व्याप्तिभङ्गरूपविशेषस्यापि [illegible]
तदा [illegible] तथापि भविष्यति तर्हि [illegible] हेतुसाध्य-
[illegible] व्याप्तिभङ्गादिदोषं [illegible] प्रतिहेतु[illegible] [illegible]
परस्य [illegible] न शक्नोति तथाप्येवं [illegible] स्यात्
यत्र [illegible]विशेषतया [illegible] न [illegible] [illegible]
तेन [illegible] तथापि प्रतिहेतुवादिना [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] इति चेन्न प्रतिहेतुवाद्यभिप्रायेणाग्रहस्य-

